श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री ब्रह्मतन्त्रस्वतन्त्रस्वामि अनुगृहीतं

# ॥ श्री दिव्यसूरिस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री दिव्यसूरिस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम्।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे॥

पर्यायभाष्यकाराय प्रणतार्तिं विधून्वते।
ब्रह्मतन्त्रस्वतन्त्राय द्वितीयब्रह्मणे नमः॥

श्रीमद् वेदान्तसिद्धान्तस्थापनानित्यदीक्षितम्।
श्रीमन् नारायणं वन्दे भान्तं सूरिगुरूत्तमैः॥ **1**॥

तुलायां श्रवणे जातं काञ्च्यां काञ्चनवारिजात्।
द्वापरे पाञ्चजन्यांशं सरोयोगिनमाश्रये॥ **2**॥

तुलाश्रविष्ठासम्भूतं भूतं कल्लोलमालिनः।
तीरे फुल्लोत्पलात् मल्लपुर्यां ईडे गदांशकम्॥ **3**॥

तुला शतभिषग्जातं मयूरपुरिकैरवात्।
महान्तं महदाख्यातं वन्दे श्रीनन्दकांशकम्॥ **4**॥

मखायां मकरे मासे चक्रांशं भार्गवोद्भवम्।
महीसारपुराधीशं भक्तिसारमहं भजे॥ **5**॥

वैशाखे तु विशाखायां कुरुकापुरिकारिजम्।
पाण्ड्यदेशे कलेरादौ शठारिं सैन्यपं भजे॥ **6**॥

चैत्रे चित्रा समुद्भूतं पाण्ड्यदेशे गणांशकम्।
श्रीपराङ्कुशसद्भक्तं मधुरं कविमाश्रये॥ 7॥

कुम्भे पुनर्वसूभवं केरळे कोळपट्टणे।
कौस्तुभांशं धराधीशं कुलशेखरमाश्रये॥ 8॥

ज्येष्ठे स्वातीभवं विष्णुरथांशं धन्विनःपुरे।
प्रपद्ये श्वशुरं विष्णोः विष्णुचित्तं पुरःशिखम्॥ 9॥

आषाढे पूर्वफल्गुन्यां तुलसीकाननोद्भवाम्।
पाण्ड्ये विश्वम्भरां गोदां वन्दे श्रीरङ्गनायिकाम्॥ 10॥

कोदण्डे ज्येष्ठनक्षत्रे मण्डङ्गुडिपुरोद्भवम्।
चोळोर्व्यां वनमालांशं भक्ताङ्घ्रिरेणुमाश्रये॥ 11॥

कार्तिके रोहिणीजातं श्रीपाणं निचुळापुरे।
श्रीवत्सांशं गायकेन्द्रं मुनिवाहनमाश्रये॥ 12॥

कार्तिके कृत्तिकाजातं चतुष्कविशिखामणिम्।
षड्प्रबन्धकृतं शार्ङ्गमूर्तिं कलियमाश्रये॥ 13॥

ज्येष्ठे अनूराधासम्भूतं वीरनारायणे पुरे।
गजवक्त्रांशमाचार्यं आद्यं नाथमुनिं भजे॥ 14॥

आषाढे च उत्तराषाढसम्भूतं तत्र वै पुरे।
सिंहाननांशं विख्यातं श्री यामुन मुनिं भजे॥ 15॥

चैत्रार्द्रा सम्भवं विष्णोः दर्शनस्थापनोत्सुकम्।
तुण्डीरमण्डले शेषमूर्तिं रामानुजं भजे॥ 16॥

तुलायां वेङ्कटाद्रौ तु पूर्वाषाढा समुद्भवम्।
कुरुकेशं प्रचण्डांशं वन्दे श्रीशैलपूर्णजम्॥ 17॥

चैत्रे चित्रोद्भवं काञ्च्यां देवराजगुरोः सुतम्।
सुभद्रांशं गुरूत्तंसं वात्स्यं वरदमाश्रये॥ **18**॥

चैत्रार्द्रा सम्भवं काञ्च्यां सुप्रतिष्ठांशमद्भुतम्।
वन्दे रामानुजार्यं श्रीनिगमान्तगुरोर्गुरुम्॥ **19**॥

नभस्य मासि श्रोणायां अनन्तार्यगुरूद्भवम्।
श्रीवेङ्कटेशघण्टांशं वेदान्तगुरुमाश्रये॥ **20**॥

श्रवणे मासि रोहिण्यां जातं वेङ्कटदेशिकात्।
विश्वामित्रान्वयाब्धीन्दुं वरदार्यमहं भजे॥ **21**॥

ब्रह्मतन्त्रस्वतन्त्रोक्तं दिव्यसूरिवरस्तुतिम्।
यः पठेत् प्रातः उत्थाय स भवेत् वैष्णवोत्तमः॥ **22**॥

आचार्यानुग्रहात् सद्यः सर्वपापैः प्रमुच्यते।
दृष्टे मनोरथान् प्राप्य त्वदृष्टे मोक्षमाप्नुयात्॥ **23**॥

॥ श्री दिव्यसूरिस्तोत्रं समाप्तम्॥